**अपसव्य** न० अपक्रान्तं सव्यात् निरा०त० । १ देहदक्षिण-भागे "तर्ज्जन्यङ्गुष्ठयोरन्तरा अपसलवि अपसव्यं वेति" २गृह्यपरिभाषिते पितृतीर्थे च । अपगतं भग्नतया भूमौ-पातितत्वात् सव्यं यत्र । भूमौ पातनेन भग्नप्रायवामाङ्गे अप वैपरीत्ये सृ—भावे यत् सव्यं गतिः । विपरीते त्रि० । "अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणमिति" याज्ञ० । "देवकर्म्मानन्तरं पितृकर्म्मकरणे प्राप्तवामोपचारनिरासाया-प्रदक्षिणव्यापार" इति श्रा०त० रघु० । आभ्युदयिके हि "निपातो न हि सव्यस्य जानुनोर्विद्यते क्वचिदिति" श्रा० त० वशिष्ठोक्तेः भूमौ पातितवामजानुकरणाभावः । अतएव "नात्रापसव्यकरणं न पैत्रं तीर्थमिष्यते" इत्यादिना अप सव्यकरणनिषेधः सूपपन्नः । पितृतीर्थञ्च "यत्रानुक्तो-विशेषस्तु दक्षिणस्तत्र शस्यते इति" स्मृतेः । दक्षिणहस्त एव । "प्राचीनावीतिना भाव्यमपसव्यमतन्द्रिणा । पितृ-मानिधनात् कार्य्यं विधिवद्दर्भपाणिना" इति मनुः ।

**अपसार** पु० अप+सृ—णिच्—अच् । १ दूरीकरणे२बहिष्करणे, ३ अपनयने ३ च । ल्युट् । अपसारणमप्यत्र न० ।

**अपसारित** त्रि० अप+सृ—णिच्—क्त । १उत्सारिते२दूरीकृते च

**अपसिद्धान्त** पु० अपक्रान्तः सिद्धान्तात् निरा०त० । १स्वीकृत-सिद्धान्तात् स्खलनरूपे दोषभेदे, "सिद्धान्तमभ्युपेत्यानिय-मात् कथाप्रसङ्गोऽपसिद्धान्त इति" गौ०सू० । सिद्धान्तं किञ्चिच्छास्त्रकाराभ्युपगतमर्थमभ्युपेत्य स्वीकृत्यानियमात् तन्नियमोल्लङ्घनात् कथायां प्रसङ्गः स्वीकृतसिद्धान्तप्रच्यवो-ऽपसिद्धान्त इति तदर्थः । यथा सांख्यमतेनाहं वदिष्यामीत्यभ्यु-पेत्य कथायामारब्धायाम् आविर्भावस्याविर्भावाङ्गीकारेऽनव-स्थेति दूषणे वादिनोद्भाविते प्रतिवादी यदा तद्दोषो-द्धारणाय आविर्भावस्यासतोऽपि समुत्पत्तिमभ्युपैति तदा सत्-कार्य्यवादिसांख्यमतविरुद्धाभिधायित्वेन स्वाभ्युपगतनिय-मातिक्रमात् स्वीकृतसिद्धान्तप्रच्यवरूपो दोषो भवति स एवापसिद्धान्तः एवमन्योऽप्युदाहार्य्यः । वितण्डावादिनः बौद्धभेदास्तु नापसिद्धान्तं दोषमङ्गीचक्रुः तेषां कस्यचित् सिद्धान्तस्यानङ्गीकारात् ।

**अपसोपान** पु० अपक्रान्तः अतिक्रान्तः सोपानमाकारेण अत्या०स० । १ हस्तिनखे ।

**अपस्कर** पु० अप+कृ—अप् रथाङ्गे नि०सुट् । १ चक्रभिन्ने रथारम्भके अवयवभेदे । "अपस्करो रथाङ्गमिति" पा० । "कूबरश्च रथस्यासीद्दारुकिर्भुजगोत्तमः । अपस्करमधिष्ठाने हिमवान् विन्ध्यपर्वत" इति भा०क०प० उक्तेः क्लीवमपि ।

**अपस्नात** त्रि० अपकृष्टं अमङ्गलार्थत्वात् स्नातः । १ मृतमुद्दिश्य स्नाते जने । २ स्नानसंस्काराय स्नापिते मृते पुंस्त्री० स्त्रीर० ।

**अपस्नान** त्रि० अपक्रान्तः स्नानात् निरा०स० । १स्नानावशिष्टे जले "उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च । श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामत" इति मनुः ।

**अपस्पश** त्रि० अपगतः स्पशोगूढ़चरोयतः । १ गूढ़चरशून्ये । "शब्दविद्येव नोभाति राजनीतिरपस्पशेति" माघः । शब्द-विद्यापक्षे पस्पशा पातञ्जलभाष्यस्य नवाह्निकं २तच्छून्येत्यर्थः ।

**अपस्मार** पु० अपस्मारयति स्मरणं विलोपयति अप+ स्मृ—णिच्-कर्त्तरि अच्, अपगतः स्मारः स्मरणं यतो वा । १रोग-भेदे । स च सुश्रुते दर्शितो यथा "स्मृतिर्भूतार्थविज्ञानमपस्तु परिवर्जने अपस्मार इति प्रोक्तस्ततोऽयं व्याधिरन्तकृत् ॥ मिथ्यादियोगेन्द्रियार्थकर्म्मणामतिसेवनात् । विरुद्धमलिना-हारविहारकुपितैर्मलैः । वेगनिग्रहशीलानामहिताशुचि-भोजिनाम् । रजस्तमोऽभिभूतानां गच्छताञ्च रजस्वलाम् ॥ तथा कामभयोद्वेगक्रोधशोकादिभिर्भृशम् । चेतस्यभिहते पुंसामपस्मारोऽभिजायते ॥ संज्ञावहेषु स्रोतःसु दोषव्याप्तेषु मानवः । रजस्तमःपरीतेषु मूढो भ्रान्तेन चेतसा ॥ विक्षिपन् हस्तपादौ च विजिह्मभ्रूर्विलोचनः । दन्तान् खादन् वमन् फेनं विवृताक्षः पतेत् क्षितौ ॥ अल्पकालान्तरञ्चापि पुनः संज्ञां लभेत सः । सोऽपस्मार इति प्रोक्तः स च दृष्टश्चतुर्विधः ॥ वातपित्तकफैर्न्नॄणाञ्चतुर्थः सन्निपाततः । हृत्कम्पः शून्यता स्वेदो ध्यानं मूर्च्छा प्रमूढता ॥ निद्रानाशश्च तस्मिंस्तु भविष्यति भवन्त्यथ । वेपमानो दशेद्दन्तान् श्वसन् फेनं वमन्नपि ॥ यो ब्रूयाद्विकृतं सत्वं कृष्णं मामनुधावति । ततो मे चित्त-नाशः स्यात्सोऽपस्मारोऽनिलात्मकः ॥ तृट्तापस्वेदमूर्च्छा-र्त्तोध्वनन्नङ्गानि विह्वलः । यो ब्रूयाद्विकृतं सत्वं पीतं मामनुधावति ॥ ततो मे चित्तनाशः स्यात्स पित्तभव उच्यते । शीतहृल्लासनिद्रार्त्तः पतन् भूमौ वमन् कफम् ॥ यो ब्रूयाद्विकृतं सत्वं शुक्लं मामनुधावति । ततो मे चित्त-नाशः स्यात्सोऽपस्मारः कफात्मकः ॥ हृदि तोदस्तृड्उत्क्लेद-स्त्रिष्वप्येतेषु संस्थया । प्रलापः कूजनं क्लेशः प्रत्येकन्तु भवेदिह ॥ सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे । अनिमित्तागमाद्व्याधेर्गमनादकृतेऽपि च ॥ आगमाच्चाप्यप-स्मारं वदन्त्यन्ये न दोषजम् । क्रमोपयोगाद्दोषाणां क्षणि-कत्वात्तथैव च ॥ आगमाद्दैवरूप्याच्च स तु निर्वर्त्यते बुधैः । वर्षत्यपि यथा देवे भूमौ वीजानि कानिचित् ॥ शरदि प्रतिरोहन्ति तथा व्याधिसमुद्भवः । स्थायिनः केचिदल्पेन